श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ अष्टमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अष्टमः सर्गः ॥

## हनुमता पुनः पुष्पकस्य दर्शनम्

स तस्य मध्ये भवनस्य संस्थितो
    महद्विमानं मणिरत्नचित्रितम्।
प्रतप्तजाम्बूनदजालकृत्रिमं
    ददर्श धीमान् पवनात्मजः कपिः ॥ **5.8.1** ॥

तदप्रमेयाप्रतिकारकृत्रिमं
    कृतं स्वयं साध्विति विश्वकर्मणा।
दिवं गते वायुपथे प्रतिष्ठितं
    व्यराजतादित्यपथस्य लक्ष्म तत् ॥ **5.8.2** ॥

न तत्र किञ्चिन्न कृतं प्रयत्नतो
    न तत्र किञ्चिन्न महार्घरत्नवत्।
न ते विशेषा नियताः सुरेष्वपि
    न तत्र किञ्चिन्न महाविशेषवत् ॥ **5.8.3** ॥

तपः समाधानपराक्रमार्जितं
    मनःसमाधानविचारचारिणम्।
अनेकसंस्थानविशेषनिर्मितं
    ततस्ततस्तुल्यविशेषनिर्मितम् ॥ **5.8.4** ॥

मनः समाधाय तु शीघ्रगामिनं
    दुरासदं मारुततुल्यगामिनम्।

www.prapatti.com

महात्मनां पुण्यकृतां महर्द्धिनां
    यशस्विनामग्र्य मुदामिवालयम् ॥ **5.8.5** ॥

विशेषमालम्ब्य विशेषसंस्थितं
    विचित्रकूटं बहुकूटमण्डितम्।
मनोऽभिरामं शरदिन्दुनिर्मलं
    विचित्रकूटं शिखरं गिरेर्यथा ॥ **5.8.6** ॥

वहन्ति यत्कुण्डलशोभितानना
    महाशना व्योमचरा निशाचराः।
विवृत्तविध्वस्तविशाललोचना
    महाजवा भूतगणाः सहस्रशः ॥ **5.8.7** ॥

वसन्तपुष्पोत्करचारुदर्शनं
    वसन्तमासादपि चारुदर्शनम्।
स पुष्पकं तत्र विमानमुत्तमं
    ददर्श तद् वानरवीरसत्तमः ॥ **5.8.8** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टमः सर्गः ॥

www.prapatti.com